**दिनाङ्कः: 07 .03.2026**
**प्रातः - 06:55**
**अथ वार्ताः**

**प्रधानमन्त्री –कृषि-वेबिनार**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी प्रोक्तवान् यत् कृषिक्षेत्रे 'प्रौद्योगिकीसंस्कृतिम्' आनेतुं सर्वकारः महद् बलं ददाति । ह्यः कृषिः-ग्रामीणपरिवर्तनं च इत्यस्मिन् विषये दृश्य-सम्मेलनद्वारा आयव्यय-प्रतिवेदनोत्तर-वेबिनार-सत्रं सम्बोधयन् श्रीमोदी अवदत् यत् केन्द्र-सर्वकारः एग्रीस्टैक् इत्यस्य माध्यमेन कृषिकार्यस्य कृते डिजिटल-सार्वजनिक-मूलसंरचनायाः विकासं कुर्वन् अस्ति।

प्रधानमन्त्रिणा उल्लेखितम् यत्, "प्रधानमन्त्रि-किसानसम्माननिधेः" कारणेन दश-कोटि कृषकेभ्यः चतुर्लक्षकोटिरूप्यकाणि प्राप्तानि सन्ति तथा च "प्रधानमन्त्रि-फसलबीमायोजना" इत्यस्य अन्तर्गतं प्रायः द्वि-लक्षकोटिरूप्यकाणां बीमा-प्रतिवेदनानां समाधानं कृतम् अस्ति।

**राष्ट्रपतिः-पश्चिम-बंगः:**

राष्ट्रपतिः द्रौपदी मुर्मूः अद्य पश्चिमबङ्गस्य डार्जिलिंग् इत्यस्य यात्रायां भविष्यति। स्वस्य भ्रमणकाले राष्ट्रपतिः नवम-अन्ताराष्ट्रिय-सन्तल-सम्मेलनस्य शोभां वर्धयिष्यति।

**लोकसभा**

लोकसभायाम् सोमवासरे सभापतेः ओम बिर्ला इत्यस्य अविश्वास-प्रस्तावस्य विचारः भविष्यति। बजटसत्रस्य द्वितीयम् चरणम् अस्य मासस्य नवम-दिनाङ्कात् आरप्स्यते। गतमासे बजटसत्रस्य प्रथमचरणस्य अवसरे विपक्षेण लोकसभायाः महासचिवस्य समक्षं अविश्वाससूचना प्रदत्ता आसीत्, यत्र सभापतिः पक्षपातपूर्णरूपेण कार्यं कृतवान् इति आरोपं कृत्वा तस्य निष्कासनं याचितम् आसीत्। अस्मिन् काङ्ग्रेस, समाजवादी पार्टी, डीएमके, वामदलम्, इत्यादिभिः सदस्यैः सह अष्टादशोत्तर-एकशतम् सांसदाः हस्ताक्षरं कृतवन्तः आसन्। भाजपा-काङ्ग्रेस-इत्यादि-राजनैतिक-दलैः, स्वसदस्येभ्यः, नवम-दशम-दिनांकयोः सदने अनिवार्य-उपस्थितेः निर्देशः प्रदत्तः।

**शाह-परियोजना**

केन्द्रीय गृह एवं सहकारिता मंत्री अमित शाहः, ह्यः, ओडिशानगरे सप्तत्रिंशत्-शताधिक-कोटिरूप्यकाणां विकासपरियोजनानां उद्घाटनम्, आधारशिलास्थापनं च कृतवान्। एतेषु राष्ट्रिय-दुग्ध-विकास-मण्डलस्य ओडिशाराज्य-सहकारीदुग्ध-निर्मातृ-सङ्घस्य विकासपरियोजनाः अथ राज्यसर्वकारस्य विविधाः परियोजनाः अपि सन्ति। श्री-शाहः भारतीयकृषक-उर्वरक-सहकारिता-नियमित-घटकस्य, तृतीय-सल्फ्यूरिक-अम्ल-संयंत्रस्य उद्घाटनं अपि कृतवान्। आन्तरिक-सुरक्षायाः विषये श्रीशाहः प्रोक्तवान् यत् केन्द्रेण वामपक्षीय-उग्रवादस्य उन्मूलनार्थं तीव्राः प्रयत्नाः कृताः, अस्य मासस्य अन्तः यावत् देशः नक्सलवादात् मुक्तः भविष्यति इति विश्वासम् अपि प्रकटितवान्।

**जयशंकर द्विपक्षीय वार्ता :**

विदेश मंत्री डॉ एस जयशंकरः नवदिल्ल्यां, उप-रैसीना-संवादम्, विभिन्नदेशानां नेतृभिः सह मिलितवान्। डॉ जयशंकरः ह्यः श्रीलङ्का, भूतान, मॉरिशस्, कीन्या, माल्ता, सेशेल्स्, रवाण्डादेशानां स्व-समकक्षैः सह द्विपक्षीयवार्तां कृतवान्।

**रेलवे- विद्युतीकरणम्**

भारतीय-रेलवे विगतदशके, रेलवे मार्गाणां विद्युतीकरणस्य कार्यम् अतिवेगेन सम्पाद्य,आयात-डीजल-ईन्धनस्य उपरि तस्य निर्भरतायाः न्यूनीकरणस्य कार्यम् अकरोत्। फलस्वरूपेण अधुना ब्रॉड-गेज रेलमार्गजालस्य नवनवतिः-दशमलव-चत्वारि प्रतिशतं विद्युत्करणं जातम्, यत् विश्वस्य बृहत्तमेषु आधारभूत-संरचनेषु अन्यतमम् अस्ति।

गोयल-एनडीसी::

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः रक्षा-अन्तरिक्ष-क्षेत्रे भारतस्य स्टार्टअप-पारिस्थितिकीतन्त्रस्य तीव्र-उत्थानस्य विषये प्रतिपादितवान्। मन्त्री अवोचत् यत् एतत् परिवर्तनं देशस्य एमएसएमई-संस्थाभिः चालितं भवति, याः संस्थाः भारतीय-नवाचारं वैश्विक-आपूर्ति-शृङ्खलासु एकीकृत्य स्थापयन्ति। श्रीगोयलः 'भारतस्य विनिर्माणक्षेत्रस्य उन्नयनम् : शासनस्य नीतेश्च भूमिका' इत्यस्मिन् विषये नवदिल्ल्याः राष्ट्रिय-रक्षा-महाविद्यालये सभां सम्बोधयन्नासीत्।

**पश्चिम एशियायां संघर्षः**

पश्चिम एशियायां संघर्षस्य अद्य अष्टमदिनं वर्तते। अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः इरान्-देशेन सह कस्यापि सन्धेः निराकरणं कृत्वा, तस्य निःशर्त-समर्पणस्य आह्वानं कृतवान्। ईरानीपक्षे ईरानीराष्ट्रपतिः मसूद पेजेश्कियन उक्तवान् यत् केचन देशाः अमेरिका-इजरायल-देशयोः सह प्रचलित-संघर्षस्य समाधानार्थं मध्यस्थताप्रयासान् आरब्धवन्तः। सामाजिकमाध्यमेषु सः अवदत् यत् इरान्-देशः, क्षेत्रे स्थायि-शान्तिं प्रति प्रतिबद्धः अस्ति तथापि राष्ट्रस्य गौरवस्य सार्वभौमत्वस्य च रक्षणे कोऽपि संकोचं नैव करोति।

**बैडमिण्टन ::**

बैडमिण्टन-क्रीडायां लक्ष्यसेनः गतरात्रौ क्वार्टर्फाइनल्-क्रीडायां चीनदेशस्य ली शिफेङ्गम् पराजितवान्।

**।। इति वार्ता:।।**